# .. shrIrAmastotram ..

## ॥ श्रीरामस्तोत्रम् ॥

वन्दामहे महेशानचण्डकोदण्डखण्डनम् ।
जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥ १॥
नुमो रामपदाम्भोजनं रेणवो यत्र सन्ततम् ।
कुर्वन्ति कुमुदप्रीतिमरण्यगृहमेधिनः ॥ २॥
स्वर्णैणाजिनशयनों योजितनयनो दशास्यदिग्भागे ।
मुहुरवलोकितचापः कोऽपि दुरापः स नीलिमा शरणम् ॥ ३॥
कनकनिकषभासा सीतयाऽऽलिङ्गिताङ्गो
नवकुवलयदामश्यामवर्णोभिरमः ।
अभिनव इव विद्युन्मण्दितो मेघखण्डः
शमयतु मम तापं पर्वतो रामचन्द्रः ॥ ४॥
उत्फुल्लामलकोमलोत्पलदलश्यामाय
रामामनःकामाय प्रथमाननिर्मलगुणग्रामाय रामात्मने ।
योगारूढमुनीन्द्रमानससरोहंसाय
संसारविध्वंसाय स्फुरदोजसे रघुकुलोतंसाय पुंसे नमः ॥ ५॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

Please send corrections to sanskrit@cheerful.com
Last updated July 20, 2014
From http://sanskritdocuments.org .
The text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or commercial purpose without permission.



From http://sanskritdocuments.org